सब प्रकारसे लाभ दिखाकर अर्जुनको युद्ध करनेके लिये आज्ञा देना ।

हतः, वा, प्राप्स्यसि, स्वर्गम्, जित्वा, वा, भोक्ष्यसे, महीम्, तस्मात्, उत्तिष्ठ, कौन्तेय, युद्धाय, कृतनिश्चयः ॥ ३७ ॥

इससे युद्ध करना तेरे लिये सब प्रकारसे अच्छा है, क्योंकि–

वा	= या (तो)	भोक्ष्यसे	= भोगेगा
हतः	= मरकर	तस्मात्	= इससे
स्वर्गम्	= स्वर्गको	कौन्तेय	= हे अर्जुन
प्राप्स्यसि	= प्राप्त होगा	युद्धाय	= युद्धके लिये
वा	= अथवा	कृतनिश्चयः	= निश्चयवाला होकर
जित्वा	= जीतकर		
महीम्	= पृथिवीको	उत्तिष्ठ	= खड़ा हो

सुख दुःखादिको समान समझकर युद्ध करनेसे पाप न लगने का कथन।

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥३८॥

सुखदुःखे, समे, कृत्वा, लाभालाभौ, जयाजयौ,
ततः, युद्धाय, युज्यस्व, न, एवम्, पापम्, अवाप्स्यसि ॥ ३८ ॥

यदि तुझे स्वर्ग तथा राज्यकी इच्छा न हो तो भी–

जयाजयौ	= जय पराजयको	युद्धाय	= युद्धके लिये
लाभालाभौ	= लाभ हानि (और)	युज्यस्व	= तैयार हो
सुखदुःखे	= सुख दुःख	एवम्	= इस प्रकार (युद्ध करनेसे) (तू)
समे	= समान	पापम्	= पापको
कृत्वा	= समझकर	न	= नहीं
ततः	= उसके उपरान्त	अवाप्स्यसि	= प्राप्त होगा

एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥

एषा, ते, अभिहिता, सांख्ये, बुद्धिः, योगे, तु, इमाम्, शृणु,
बुद्ध्या, युक्तः, यया, पार्थ, कर्मबन्धम्, प्रहास्यसि ॥३९॥

निष्काम कर्मयोगका विषय सुननेके लियें भगवान् की आज्ञा और उसके महत्त्वका कथन ।

पार्थ	=हे पार्थ	योगे	=निष्काम कर्मयोगके विषयमें
एषा	=यह	शृणु	=सुन (कि)
बुद्धिः	=बुद्धि	यया	=जिस
ते	=तेरे लिये	बुद्ध्या	=बुद्धिसे
सांख्ये	=ज्ञानयोगके* विषयमें	युक्तः	=युक्त हुआ (तूं)
अभिहिता	=कही गयी	कर्मबन्धम्	=कर्मोंके बन्धनको
तु	=और	प्रहास्यसि	=अच्छी तरहसे नाश करेगा
इमाम्	=इसीको (अब)		

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥४०॥

निष्कामकर्मयोगके प्रभाव का कथन ।

न, इह, अभिक्रमनाशः, अस्ति, प्रत्यवायः, न, विद्यते,
स्वल्पम्, अपि, अस्य, धर्मस्य, त्रायते, महतः, भयात् ॥४०॥

---

*+ अध्याय ३ श्लोक ३ की टिप्पणीमें इसका विस्तार देखना चाहिये।

और—

इह	= इस निष्काम कर्मयोगमें	अस्य	= (इसलिये) इस (निष्काम कर्मयोगरूप)
अभिक्रम-नाशः	= आरम्भका अर्थात् बीजका नाश	धर्मस्य	= धर्मका
		स्वल्पम्	= थोड़ा
न	= नहीं	अपि	= भी (साधन)
अस्ति	= है (और)	महतः	= जन्ममृत्युरूप महान्
प्रत्यवायः	= उलटा फलरूप दोष (भी)	भयात्	= भयसे
न	= नहीं	त्रायते	= उद्धार कर देता है
विद्यते	= होता है		

निश्चयात्मक और अनिश्चयात्मक बुद्धि के स्वरूप का निरूपण।

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्॥

व्यवसायात्मिका, बुद्धिः, एका, इह, कुरुनन्दन, बहुशाखाः, हि, अनन्ताः, च, बुद्धयः, अव्यवसायिनाम् ॥४१॥

और—

कुरुनन्दन	= हे अर्जुन	एका हि	= एक ही है
इह	= इस (कल्याणमार्गमें)	च	= और
व्यवसायात्मिका	= निश्चयात्मक	अव्यवसायिनाम्	= अज्ञानी (सकामी) पुरुषोंकी
बुद्धिः	= बुद्धि	बुद्धयः	= बुद्धियां

बहुशाखाः	=बहुत भेदोंवाली	अनन्ताः	=अनन्त-होती हैं

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः॥ ४२ ॥
कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥ ४३ ॥

सकामी पुरुषों के स्वभाव का कथन ।

याम्, इमाम्, पुष्पिताम्, वाचम्, प्रवदन्ति, अविपश्चितः, वेदवादरताः, पार्थ, न, अन्यत्, अस्ति, इति, वादिनः ॥४२॥
कामात्मानः, स्वर्गपराः, जन्मकर्मफलप्रदाम्, क्रियाविशेषबहुलाम्, भोगैश्वर्यगतिम्, प्रति ॥४३॥

और—

पार्थ	=हे अर्जुन (जो)	वादिनः	=कहनेवाले हैं (वे)
कामात्मानः	=सकामी पुरुष	अविपश्चितः	=अविवेकीजन
वेदवादरताः	=केवल फल-श्रुतिमें प्रीति रखनेवाले	जन्मकर्मफलप्रदाम्	=जन्मरूप कर्मफलको देनेवाली
स्वर्गपराः	=स्वर्गको ही परम श्रेष्ठ माननेवाले		(और)
	(इससे बढ़कर)	भोगैश्वर्यगतिम् प्रति	=भोग तथा ऐश्वर्यकी प्राप्तिके लिये
अन्यत्	=और कुछ		
न	=नहीं	क्रियाविशेषबहुलाम्	=बहुत-सी क्रियाओंके विस्तारवाली
अस्ति	=है		
इति	=ऐसे		

इमाम्	= इस प्रकारकी	वाचम्	= वाणीको
याम्	= जिस		
पुष्पिताम्	= { दिखाऊ शोभायुक्त	प्रवदन्ति	= कहते हैं

सकामी पुरुषों-के अन्तःकरण-में निश्चयात्मक बुद्धि न होनेका कथन।

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम्।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते॥४४॥

भोगैश्वर्यप्रसक्तानाम्, तया, अपहृतचेतसाम्, व्यवसायात्मिका, बुद्धिः, समाधौ, न, विधीयते ॥ ४४ ॥

तया	= उस वाणीद्वारा		(उन पुरुषोंके)
अपहृत-चेतसाम्	= { हरे हुए चित्तवाले	समाधौ	= अन्तःकरणमें
(तथा)		व्यव-सायात्मिका	= निश्चयात्मक
भोगैश्वर्य-प्रसक्तानाम्	= { भोग और ऐश्वर्यमें आसक्तिवाले	बुद्धिः	= बुद्धि
		न	= नहीं
		विधीयते	= होती है

निष्कामी और आत्म-परायण होनेके लिये आज्ञा।

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान्॥

त्रैगुण्यविषयाः, वेदाः, निस्त्रैगुण्यः, भव, अर्जुन, निर्द्वन्द्वः, नित्यसत्त्वस्थः, निर्योगक्षेमः, आत्मवान् ॥ ४५ ॥

और—

अर्जुन	= हे अर्जुन	वेदाः	= सब वेद

त्रैगुण्यविषयाः = तीनों गुणोंके कार्यरूप संसारको विषय करनेवाले अर्थात् प्रकाश करनेवाले हैं	(और)
(इसलिये तूं)	निर्द्वन्द्वः = सुखदुःखादि द्वन्द्वोंसे रहित
निस्त्रैगुण्यः = असंसारी अर्थात् निष्कामी	नित्यसत्त्वस्थः = नित्य वस्तुमें स्थित (तथा)
	निर्योगक्षेमः = योग*क्षेमको† न चाहनेवाला
	(और)
	आत्मवान् = आत्मपरायण
	भव = हो

यावानर्थ उदपाने सर्वतः संप्लुतोदके ।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥४६॥

जलाशय के दृष्टान्तसे ब्रह्मज्ञानकी महिमा ।

यावान्, अर्थः, उदपाने, सर्वतः, संप्लुतोदके,
तावान्, सर्वेषु, वेदेषु, ब्राह्मणस्य, विजानतः ॥ ४६ ॥

क्योंकि—

(मनुष्यका)	उदपाने = छोटे जलाशयमें
सर्वतः = सब ओरसे	यावान् = जितना
संप्लुतोदके = परिपूर्ण जलाशयके	अर्थः = प्रयोजन
(प्राप्ते सति) = प्राप्त होनेपर	(अस्ति) = रहता है

* अप्राप्तकी प्राप्तिका नाम 'योग' है। † प्राप्त वस्तुकी रक्षाका नाम 'क्षेम' है।

विजानतः	= अच्छी प्रकार ब्रह्मको जानने-वाले	सर्वेषु	= सब
		वेदेषु	= वेदोंमें
ब्राह्मणस्य	= ब्राह्मणका (भी)	तावान्	= उतना ही प्रयोजन रहता है

अर्थात् जैसे बड़े जलाशयके प्राप्त हो जानेपर जलके लिये छोटे जलाशयोंकी आवश्यकता नहीं रहती, वैसे ही ब्रह्मानन्दकी प्राप्ति होनेपर आनन्दके लिये वेदोंकी आवश्यकता नहीं रहती।

फलासक्तिको त्यागकर कर्म करनेके लिये प्रेरणा और कर्म-त्यागका निषेध।

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥४७॥

कर्मणि, एव, अधिकारः, ते, मा, फलेषु, कदाचन,
मा, कर्मफलहेतुः, भूः, मा, ते, सङ्गः, अस्तु, अकर्मणि ॥४७॥

इससे—

ते	= तेरा		(भी)
कर्मणि	= कर्म करनेमात्रमें	मा	= मत
एव	= ही	भूः	= हो (तथा)
अधिकारः	= अधिकार होवे	ते	= तेरी
फलेषु	= फलमें	अकर्मणि	= कर्म न करनेमें (भी)
कदाचन	= कभी	सङ्गः	= प्रीति
मा	= नहीं (और तू)	मा	= न
कर्मफल-हेतुः	= कर्मोंके फलकी वासनावाला	अस्तु	= होवे

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनंजय।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥

आसक्तिको त्यागकर समत्व बुद्धिसे कर्म करनेके लिये आज्ञा।

योगस्थः, कुरु, कर्माणि, सङ्गम्, त्यक्त्वा, धनंजय,
सिद्ध्यसिद्ध्योः, समः, भूत्वा, समत्वम्, योगः, उच्यते॥४८॥

धनंजय	=हे धनंजय	भूत्वा	=होकर
सङ्गम्	=आसक्तिको	योगस्थः	=योगमें स्थित हुआ
त्यक्त्वा	=त्यागकर (तथा)	कर्माणि	=कर्मोंको
सिद्ध्यसिद्ध्योः	=सिद्धि और असिद्धिमें	कुरु	=कर (यह)
समः	=समान बुद्धिवाला	समत्वम्	=समत्वभाव* ही
		योगः	=योग (नामसे)
		उच्यते	=कहा जाता है

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः॥४९॥

सकाम कर्मकी निन्दा और निष्कामकर्मयोग की प्रशंसा।

दूरेण, हि, अवरम्, कर्म, बुद्धियोगात्, धनंजय,
बुद्धौ, शरणम्, अन्विच्छ, कृपणाः, फलहेतवः॥४९॥

इस समत्वरूप—

बुद्धियोगात्	=बुद्धियोगसे	(अतः)	=इसलिये
कर्म	=(सकाम) कर्म	धनंजय	=हे धनंजय
दूरेण	=अत्यन्त	बुद्धौ	=समत्वबुद्धि-योगका
अवरम्	=तुच्छ है		

* जो कुछ भी कर्म किया जाय उसके पूर्ण होने और न होनेमें तथा उसके फलमें समभाव रहनेका नाम "समत्व" है।

शरणम्	= आश्रय	फलहेतवः	= फलकी वासनावाले
अन्विच्छ	= ग्रहण कर	कृपणाः	= अत्यन्त दीन हैं
हि	= क्योंकि		

निष्काम कर्मयोगीके पुण्य-पापोंकी निवृत्तिका कथन और निष्काम कर्म करनेके लिये आज्ञा।

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्॥

बुद्धियुक्तः, जहाति, इह, उभे, सुकृतदुष्कृते, तस्मात्, योगाय, युज्यस्व, योगः, कर्मसु, कौशलम् ॥५०॥

और—

बुद्धियुक्तः	= समत्वबुद्धियुक्त पुरुष	तस्मात्	= इससे
सुकृत-दुष्कृते	= पुण्य पाप	योगाय	= समत्वबुद्धियोगके लिये ही
उभे	= दोनोंको	युज्यस्व	= चेष्टा कर
इह	= इस लोकमें		(यह)
(एव)	= ही	योगः	= समत्वबुद्धिरूप योग ही
जहाति	= त्याग देता है अर्थात् उनसे लिपायमान नहीं होता	कर्मसु	= कर्मोंमें
		कौशलम्	= चतुरता है अर्थात् कर्म-बन्धनसे छूटनेका उपाय है

कर्मफलके त्यागसे परमपदकी प्राप्ति।

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम्॥

कर्मजम्, बुद्धियुक्ताः, हि, फलम्, त्यक्त्वा, मनीषिणः, जन्मबन्धविनिर्मुक्ताः, पदम्, गच्छन्ति, अनामयम् ॥५१॥

हि	= क्योंकि	जन्मबन्ध-विनिर्मुक्ताः	= जन्मरूप बन्धनसे छूटे हुए
बुद्धियुक्ताः	= बुद्धियोगयुक्त		
मनीषिणः	= ज्ञानीजन		
कर्मजम्	= कर्मोंसे उत्पन्न होनेवाले	अनामयम्	= निर्दोष अर्थात् अमृतमय
फलम्	= फलको	पदम्	= परमपदको
त्यक्त्वा	= त्यागकर	गच्छन्ति	= प्राप्त होते हैं

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥५२॥

मोहका नाश होनेसे वैराग्यकी प्राप्ति ।

यदा, ते, मोहकलिलम्, बुद्धिः, व्यतितरिष्यति,
तदा, गन्तासि, निर्वेदम्, श्रोतव्यस्य, श्रुतस्य, च ॥५२॥

और हे अर्जुन—

यदा	= जिस कालमें	तदा	= तब
ते	= तेरी	(त्वम्)	= तूं
बुद्धिः	= बुद्धि	श्रोतव्यस्य	= सुनने योग्य
मोह-कलिलम्	= मोहरूप दलदलको	च	= और
		श्रुतस्य	= सुने हुएके
व्यति-तरिष्यति	= बिल्कुल तर जायगी	निर्वेदम्	= वैराग्यको
		गन्तासि	= प्राप्त होगा

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥५३॥

बुद्धिकी स्थिरतासे योगकी प्राप्ति ।

श्रुतिविप्रतिपन्ना, ते, यदा, स्थास्यति, निश्चला,
समाधौ, अचला, बुद्धिः, तदा, योगम्, अवाप्स्यसि ॥५३॥

और–

यदा	= जब	समाधौ	= परमात्माके स्वरूपमें
ते	= तेरी	अचला	= अचल (और)
श्रुति-विप्रतिपन्ना	= अनेक प्रकारके सिद्धान्तोंको सुननेसे विचलित हुई	निश्चला	= स्थिर
		स्थास्यति	= ठहर जायगी
		तदा	= तब (तू)
		योगम्	= समत्वरूप योगको
बुद्धिः	= बुद्धि	अवाप्स्यसि	= प्राप्त होगा

अर्जुन उवाच

स्थिरबुद्धि पुरुष-के विषय में अर्जुनके चार प्रश्न।

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम्॥

स्थितप्रज्ञस्य, का, भाषा, समाधिस्थस्य, केशव, स्थितधीः, किम्, प्रभाषेत, किम्, आसीत, व्रजेत, किम् ॥५४॥

इस प्रकार भगवान्के वचनोंको सुनकर अर्जुनने पूछा–

केशव	= हे केशव	स्थितधीः	= स्थिरबुद्धि पुरुष
समाधिस्थस्य	= समाधिमें स्थित	किम्	= कैसे
		प्रभाषेत	= बोलता है
स्थितप्रज्ञस्य	= स्थिरबुद्धि-वाले पुरुषका	किम्	= कैसे
का	= क्या	आसीत	= बैठता है
भाषा	= लक्षण है (और)	किम्	= कैसे
		व्रजेत	= चलता है

श्रीभगवानुवाच

प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥

समाधिमें स्थित हुए स्थिरबुद्धि पुरुषके लक्षण ।

प्रजहाति, यदा, कामान्, सर्वान्, पार्थ, मनोगतान्,
आत्मनि, एव, आत्मना, तुष्टः, स्थितप्रज्ञः, तदा, उच्यते ॥५५॥

उसके उपरान्त श्रीकृष्ण महाराज बोले—

पार्थ	= हे अर्जुन	तदा	= उस कालमें
यदा	= जिस कालमें (यह पुरुष)	आत्मना	= आत्मासे
		एव	= ही
मनोगतान्	= मनमें स्थित	आत्मनि	= आत्मामें
सर्वान्	= संपूर्ण	तुष्टः	= संतुष्ट हुआ
कामान्	= कामनाओंको	स्थितप्रज्ञः	= स्थिरबुद्धिवाला
प्रजहाति	= त्याग देता है	उच्यते	= कहा जाता है

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥५६॥

स्थिरबुद्धि पुरुषके अन्तःकरण और वचनोंमें रागद्वेषादि के अभावका कथन

दुःखेषु, अनुद्विग्नमनाः, सुखेषु, विगतस्पृहः,
वीतरागभयक्रोधः, स्थितधीः, मुनिः, उच्यते ॥५६॥

तथा—

दुःखेषु	= दुःखोंकी प्राप्तिमें	विगतस्पृहः	= दूर हो गयी है स्पृहा जिसकी (तथा)
अनुद्विग्नमनाः	= उद्वेगरहित है मन जिसका (और)		
सुखेषु	= सुखोंकी प्राप्तिमें	वीतरागभयक्रोधः	= नष्ट हो गये हैं राग, भय और क्रोध जिसके

	(ऐसा)	स्थितधीः	= स्थिरबुद्धि
मुनिः	= मुनि	उच्यते	= कहा जाता है

["] **यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।**
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥५७॥

यः, सर्वत्र, अनभिस्नेहः, तत्, तत्, प्राप्य, शुभाशुभम्, न, अभिनन्दति, न, द्वेष्टि, तस्य, प्रज्ञा, प्रतिष्ठिता ॥५७॥

और–

यः	= जो पुरुष	न	= न
सर्वत्र	= सर्वत्र	अभिनन्दति	= प्रसन्न होता है (और)
अनभिस्नेहः	= स्नेहरहित हुआ		
तत् तत्	= उस उस	न	= न
शुभाशुभम्	= शुभ तथा अशुभ (वस्तुओं) को	द्वेष्टि	= द्वेष करता है
		तस्य	= उसकी
		प्रज्ञा	= बुद्धि
प्राप्य	= प्राप्त होकर	प्रतिष्ठिता	= स्थिर है

तीसरे प्रश्नके उत्तरमें कछुएके दृष्टान्तसे इन्द्रिय-निग्रहका निरूपण ।

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥

यदा, संहरते, च, अयम्, कूर्मः, अङ्गानि, इव, सर्वशः, इन्द्रियाणि, इन्द्रियार्थेभ्यः, तस्य, प्रज्ञा, प्रतिष्ठिता ॥५८॥

च	= और	इव	= जैसे (समेट लेता है, वैसे ही)
कूर्मः	= कछुआ (अपने)		
अङ्गानि	= अङ्गोंको	अयम्	= यह पुरुष

यदा =जब

सर्वशः =सब ओरसे (अपनी)

इन्द्रियाणि =इन्द्रियोंको

इन्द्रियार्थेभ्यः= { इन्द्रियोंके विषयोंसे

संहरते =समेट लेता है (तब)

तस्य =उसकी

प्रज्ञा =बुद्धि

प्रतिष्ठिता =स्थिर होती है

विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥ ५९ ॥

हठपूर्वक भोगोंका त्याग करनेसे भी आसक्ति नष्ट न होनेका और परमात्म-दर्शनसे नष्ट होनेका कथन ।

विषयाः, विनिवर्तन्ते, निराहारस्य, देहिनः,
रसवर्जम्, रसः, अपि, अस्य, परम्, दृष्ट्वा, निवर्तते ॥५९॥

यद्यपि—

(इन्द्रियोंके द्वारा)

निराहारस्य= { विषयोंको न ग्रहण करनेवाले

देहिनः =पुरुषके (भी) (केवल)

विषयाः =विषय (तो)

विनिवर्तन्ते= { निवृत्त हो जाते हैं (परन्तु)

रसवर्जम्=राग नहीं (निवृत्त होता) (और)

अस्य =इस पुरुषका (तो)

रसः =राग

अपि =भी

परम् =परमात्माको

दृष्ट्वा =साक्षात्करके

निवर्तते =निवृत्त हो जाता है

इन्द्रियों-की प्रबलताका निरूपण।

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः॥

यततः, हि, अपि, कौन्तेय, पुरुषस्य, विपश्चितः,
इन्द्रियाणि, प्रमाथीनि, हरन्ति, प्रसभम्, मनः ॥६०॥

और—

कौन्तेय	=हे अर्जुन	**मनः**	=मनको
हि	=जिससे (कि)	**प्रमाथीनि**	= { यह प्रमथन स्वभाववाली
यततः	=यत्न करते हुए		
विपश्चितः	=बुद्धिमान्	**इन्द्रियाणि**	=इन्द्रियां
पुरुषस्य	=पुरुषके	**प्रसभम्**	=बलात्कारसे
अपि	=भी	**हरन्ति**	=हर लेती हैं

इन्द्रियोंको वशमें करके भगवत्-परायण होनेके लिये प्रेरणा।

तानि सर्वाणि संयम्य युक्त आसीत मत्परः।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता॥

तानि, सर्वाणि, संयम्य, युक्तः, आसीत, मत्परः,
वशे, हि, यस्य, इन्द्रियाणि, तस्य, प्रज्ञा, प्रतिष्ठिता ॥६१॥

इसलिये मनुष्यको चाहिये कि—

तानि	=उन	**हि**	=क्योंकि
सर्वाणि	=संपूर्ण इन्द्रियोंको	**यस्य**	=जिस पुरुषके
संयम्य	=वशमें करके	**इन्द्रियाणि**	=इन्द्रियां
		वशे	=वशमें होती हैं
युक्तः	=समाहित चित्त हुआ	**तस्य**	=उसकी (ही)
मत्परः	=मेरे परायण	**प्रज्ञा**	=बुद्धि
आसीत	=स्थित होवे	**प्रतिष्ठिता**	=स्थिर होती है

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते ॥

ध्यायतः, विषयान्, पुंसः, सङ्गः, तेषु, उपजायते,
सङ्गात्, संजायते, कामः, कामात्, क्रोधः, अभिजायते ॥६२॥

विषयोंके चिन्तनसे आसक्तिआदि अवगुणोंकी क्रमसे उत्पत्ति और अधःपतन होनेका कथन।

और हे अर्जुन! मनसहित इन्द्रियोंको वशमें करके मेरे परायण न होनेसे मनके द्वारा विषयोंका चिन्तन होता है और—

विषयान् = विषयोंको
ध्यायतः = चिन्तन करनेवाले
पुंसः = पुरुषकी
तेषु = उन विषयोंमें
सङ्गः = आसक्ति
उपजायते = हो जाती है (और)
सङ्गात् = आसक्तिसे
(उन विषयोंकी)
कामः = कामना
संजायते = उत्पन्न होती है (और)
कामात् = कामना (में विघ्न पड़ने) से
क्रोधः = क्रोध
अभिजायते = उत्पन्न होता है

क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः । [,,]
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥

क्रोधात्, भवति, संमोहः, संमोहात्, स्मृतिविभ्रमः,
स्मृतिभ्रंशात्, बुद्धिनाशः, बुद्धिनाशात्, प्रणश्यति ॥६३॥

और—

क्रोधात् = क्रोधसे
भवति = उत्पन्न होता है
संमोहः = अविवेक अर्थात् मूढ़भाव
(और)
संमोहात् = अविवेकसे

स्मृति-विभ्रमः	= स्मरणशक्ति भ्रमित हो जाती है (और)		(और)
स्मृति-भ्रंशात्	= स्मृतिके भ्रमित हो जानेसे	बुद्धिनाशात्	= बुद्धिके नाश होनेसे (यह पुरुष)
बुद्धिनाशः	= बुद्धि अर्थात् ज्ञानशक्तिका नाश हो जाता है	प्रणश्यति	= अपने श्रेय-साधनसे गिर जाता है

चौथे प्रश्नके उत्तरमें रागद्वेष-रहित इन्द्रियों-द्वारा कर्मकरनेसे अन्तःकरण शुद्ध होकर बुद्धि स्थिर होनेका कथन।

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥६४॥

रागद्वेषवियुक्तैः, तु, विषयान्, इन्द्रियैः, चरन्, आत्मवश्यैः, विधेयात्मा, प्रसादम् अधिगच्छति ॥ ६४ ॥

तु	= परन्तु	इन्द्रियैः	= इन्द्रियोंद्वारा
विधेयात्मा	= स्वाधीन अन्तःकरण-वाला (पुरुष)	विषयान्	= विषयोंको
		चरन्	= भोगता हुआ
रागद्वेष-वियुक्तैः	= रागद्वेषसे रहित	प्रसादम्	= अन्तःकरणकी प्रसन्नता अर्थात् स्वच्छताको
आत्मवश्यैः	= अपने वशमें की हुई	अधि-गच्छति	= प्राप्त होता है

[„] **प्रसादे सर्वदुःखानां हानिरस्योपजायते ।**
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥६५॥

प्रसादे, सर्वदुःखानाम्, हानिः, अस्य, उपजायते,
प्रसन्नचेतसः, हि, आशु, बुद्धिः, पर्यवतिष्ठते ॥६५॥

और–

प्रसादे	= (उस) निर्मलताके होनेपर	प्रसन्नचेतसः	= प्रसन्नचित्त-वाले पुरुषकी
अस्य	= इसके	बुद्धिः	= बुद्धि
सर्वदुःखानाम्	= संपूर्ण दुःखोंका	आशु	= शीघ्र
हानिः	= अभाव	हि	= ही
उपजायते	= हो जाता है (और उस)	पर्यवतिष्ठते	= अच्छी प्रकार स्थिर हो जाती है

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥

साधनरहित पुरुषको आस्तिकता, शान्ति और सुख की अप्राप्ति ।

न, अस्ति, बुद्धिः, अयुक्तस्य, न, च, अयुक्तस्य, भावना,
न, च, अभावयतः, शान्तिः, अशान्तस्य, कुतः, सुखम् ॥६६॥

और हे अर्जुन–

अयुक्तस्य	= साधनरहित पुरुषके (अन्तःकरणमें)	च	= और (उस)
बुद्धिः	= श्रेष्ठ बुद्धि	अयुक्तस्य	= अयुक्तके (अन्तःकरणमें)
न	= नहीं	भावना	= आस्तिकभाव भी
अस्ति	= होती है	न	= नहीं होता है (और)

अभावयतः = बिना आस्तिक-भाववाले पुरुषको
शान्तिः = शान्ति
च = भी
न = नहीं (होती)
(फिर)
अशान्तस्य = शान्तिरहित पुरुषको
सुखम् = सुख
कुतः = कैसे (हो सकता है)

नौकाके दृष्टान्तसे वशमें न की हुई इन्द्रियोंद्वारा बुद्धिके विचलित किये जाने का कथन।

इन्द्रियाणां हि चरतां यन्मनोऽनु विधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥६७॥

इन्द्रियाणाम्, हि, चरताम्, यत्, मनः, अनु, विधीयते,
तत्, अस्य, हरति, प्रज्ञाम्, वायुः, नावम्, इव, अम्भसि ॥६७॥

हि = क्योंकि
अम्भसि = जलमें
वायुः = वायु
नावम् = नावको
इव = जैसे (हर लेता है, वैसे ही विषयोंमें)
चरताम् = विचरती हुई
इन्द्रियाणाम् = इन्द्रियोंके बीचमें
यत् = जिस (इन्द्रियके)
अनु = साथ
मनः = मन
विधीयते = रहता है
तत् = वह (एक ही इन्द्रिय)
अस्य = इस (अयुक्त) पुरुषकी
प्रज्ञाम् = बुद्धिको
हरति = हरण कर लेती है

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥

तस्मात्, यस्य, महाबाहो, निगृहीतानि, सर्वशः,
इन्द्रियाणि, इन्द्रियार्थेभ्यः, तस्य, प्रज्ञा, प्रतिष्ठिता ॥ ६८ ॥

स्थिरबुद्धि पुरुषके लक्षणों में इन्द्रियनिग्रहकी प्रधानता ।

तस्मात् = इससे
महाबाहो = हे महाबाहो
यस्य = जिस पुरुषकी
इन्द्रियाणि = इन्द्रियां
सर्वशः = सब प्रकार
इन्द्रियार्थेभ्यः = इन्द्रियोंके विषयोंसे
निगृहीतानि = वशमें की हुई होती हैं
तस्य = उसकी
प्रज्ञा = बुद्धि
प्रतिष्ठिता = स्थिर होती है

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥

या, निशा, सर्वभूतानाम्, तस्याम्, जागर्ति, संयमी,
यस्याम्, जाग्रति, भूतानि, सा, निशा, पश्यतः, मुनेः ॥६९॥

अज्ञानियोंके निश्चयमें परमात्मतत्त्वके अभाव का और आत्मज्ञानियों के निश्चयमें सृष्टिके अभाव का निरूपण ।

और हे अर्जुन—

सर्वभूतानाम् = संपूर्ण भूत प्राणियोंके लिये
या = जो
निशा = रात्रि है
तस्याम् = उस नित्य शुद्ध बोधस्वरूप परमानन्दमें (भगवत्को प्राप्त हुआ)

संयमी	=योगी पुरुष	जाग्रति	=जागते हैं
जागर्ति	=जागता है (और)	पश्यतः	=तत्त्वको जाननेवाले
यस्याम्	=जिस नाशवान् क्षणभङ्गुर सांसारिक सुखमें	मुनेः	=मुनिके लिये
		सा	=वह
भूतानि	=सब भूत प्राणी	निशा	=रात्रि है

समुद्रके दृष्टान्तसे निष्कामी पुरुषकी महिमा।

आपूर्यमाणमचलप्रतिष्ठं
समुद्रमापः प्रविशन्ति यद्वत्।
तद्वत्कामा यं प्रविशन्ति सर्वे
स शान्तिमाप्नोति न कामकामी ॥७०॥

आपूर्यमाणम्, अचलप्रतिष्ठम्, समुद्रम्, आपः, प्रविशन्ति, यद्वत्, तद्वत्, कामाः, यम्, प्रविशन्ति, सर्वे, सः, शान्तिम्, आप्नोति, न, कामकामी ॥७०॥

और—

यद्वत्	=जैसे		(उसको चलायमान न करते हुए ही)
आपूर्यमाणम्	=सब ओरसे परिपूर्ण	प्रविशन्ति	=समा जाते हैं
अचलप्रतिष्ठम्	=अचल प्रतिष्ठावाले	तद्वत्	=वैसे ही
समुद्रम्	=समुद्रके प्रति		
आपः	=नाना नदियोंके जल	यम्	=जिस (स्थिरबुद्धि) पुरुषके प्रति

सर्वे =संपूर्ण
कामाः =भोग (किसी प्रकारका विकार उत्पन्न किये विना ही)
प्रविशन्ति =समा जाते हैं
सः =वह (पुरुष)
शान्तिम् =परम शान्तिको
आप्नोति =प्राप्त होता है
न =न कि
कामकामी ={भोगोंको चाहनेवाला

विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः ।
निर्ममो निरहंकारः स शान्तिमधिगच्छति ॥

संपूर्ण कामना और अहंता, ममताके त्यागसे परम शान्तिकी प्राप्ति ।

विहाय, कामान्, यः, सर्वान्, पुमान्, चरति, निःस्पृहः, निर्ममः, निरहंकारः, सः, शान्तिम्, अधिगच्छति ॥७१॥

क्योंकि–

यः =जो
पुमान् =पुरुष
सर्वान् =संपूर्ण
कामान् =कामनाओंको
विहाय =त्यागकर
निर्ममः =ममतारहित (और)
निरहंकारः =अहंकाररहित
निःस्पृहः ={स्पृहारहित हुआ
चरति =वर्तता है
सः =वह
शान्तिम् =शान्तिको
अधिगच्छति=प्राप्त होता है

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥

ब्राह्मीस्थितिकी महिमा ।

एषा, ब्राह्मी, स्थितिः, पार्थ, न, एनाम्, प्राप्य, विमुह्यति, स्थित्वा, अस्याम्, अन्तकाले, अपि, ब्रह्मनिर्वाणम्, ऋच्छति ७२

पार्थ =हे अर्जुन
एषा =यह
ब्राह्मी ={ब्रह्मको प्राप्त हुए पुरुषकी

स्थितिः	=स्थिति है	अपि	=भी
एनाम्	=इसको	अस्याम्	=इस निष्ठामें
प्राप्य	=प्राप्त होकर	स्थित्वा	=स्थित होकर
न विमुह्यति	=मोहित नहीं होता है (और)	ब्रह्मनिर्वाणम्	=ब्रह्मानन्दको
अन्तकाले	=अन्तकालमें	ऋच्छति	=प्राप्त हो जाता है

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे सांख्ययोगो नाम द्वितीयोऽध्यायः ॥२॥

अथ तृतीयोऽध्यायः

प्रधान विषय—१ से ८ तक ज्ञानयोग और निष्काम कर्मयोगके अनुसार अनासक्तभावसे नियतकर्म करनेकी श्रेष्ठताका निरूपण। (९–१६) यज्ञादि कर्म करनेकी आवश्यकताका निरूपण। (१७–२४) ज्ञानवान् और भगवान्‌के लिये भी लोकसंग्रहार्थ कर्म करनेकी आवश्यकता। (२५–३५) अज्ञानी और ज्ञानवान्‌के लक्षण तथा रागद्वेषसे रहित होकर कर्म करनेके लिये प्रेरणा। (३६–४३) कामके निरोधका विषय।

अर्जुन उवाच

ज्ञान और कर्मकी श्रेष्ठताके विषयमें अर्जुनकी शङ्का और निश्चित मत कहनेके लिये भगवान् से प्रार्थना।

ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन।
तत्किं कर्मणि घोरे मां नियोजयसि केशव॥

ज्यायसी, चेत्, कर्मणः, ते, मता, बुद्धिः, जनार्दन, तत्, किम्, कर्मणि, घोरे, माम्, नियोजयसि, केशव ॥१॥

इसपर अर्जुनने प्रश्न किया कि—

जनार्दन	=हे जनार्दन	चेत्	=यदि

कर्मणः	=कर्मोंकी अपेक्षा	केशव	=हे केशव
बुद्धिः	=ज्ञान	माम्	=मुझे
ते	=आपके	घोरे	=भयङ्कर
ज्यायसी	=श्रेष्ठ	कर्मणि	=कर्ममें
मता	=मान्य है	किम्	=क्यों
तत्	=तो फिर	नियोजयसि	=लगाते हैं

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे । [„]
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥

व्यामिश्रेण, इव, वाक्येन, बुद्धिम्, मोहयसि, इव, मे,
तत्, एकम्, वद, निश्चित्य, येन, श्रेयः, अहम्, आप्नुयाम् ॥२॥

तथा आप–

व्यामिश्रेण इव	=मिले हुएसे	तत्	=उस
वाक्येन	=वचनसे	एकम्	=एक (बात) को
मे	=मेरी	निश्चित्य	=निश्चय करके
बुद्धिम्	=बुद्धिको	वद	=कहिये (कि)
मोहयसि इव	=मोहितसी करते हैं (इसलिये)	येन	=जिससे
		अहम्	=मैं
		श्रेयः	=कल्याणको
		आप्नुयाम्	=प्राप्त होऊं

श्रीभगवानुवाच

लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ॥

अधिकारीभेद-से दो प्रकारकी निष्ठा ।

लोके, अस्मिन्, द्विविधा, निष्ठा, पुरा, प्रोक्ता, मया, अनघ,
ज्ञानयोगेन, सांख्यानाम्, कर्मयोगेन, योगिनाम् ॥ ३ ॥

इस प्रकार अर्जुनके पूछनेपर भगवान् श्रीकृष्ण महाराज बोले-

अनघ	= हे निष्पाप (अर्जुन)	पुरा	= पहिले
		प्रोक्ता	= कही गयी है
अस्मिन्	= इस	सांख्यानाम्	= ज्ञानियोंकी
लोके	= लोकमें	ज्ञानयोगेन	= ज्ञानयोगसे † (और)
द्विविधा	= दो प्रकारकी	योगिनाम्	= योगियोंकी
निष्ठा	= निष्ठा *	कर्मयोगेन	= निष्काम कर्मयोगसे ‡
मया	= मेरेद्वारा		

भगवत्प्राप्तिके लिये कर्मोंके त्यागका निषेध।

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च संन्यसनादेव सिद्धिं समधिगच्छति ॥ ४ ॥

न, कर्मणाम्, अनारम्भात्, नैष्कर्म्यम्, पुरुषः, अश्नुते,
न, च, सन्यसनात्, एव, सिद्धिम्, समधिगच्छति ॥ ४ ॥

---

* साधनकी परिपक्व अवस्था अर्थात् पराकाष्ठाका नाम 'निष्ठा' है।

† मायासे उत्पन्न हुए संपूर्ण गुण ही गुणोंमें बर्तते हैं, ऐसे समझकर तथा मन, इन्द्रिय और शरीरद्वारा होनेवाली संपूर्ण क्रियाओंमें कर्तापनके अभिमानसे रहित होकर सर्वव्यापी सच्चिदानन्दघन परमात्मामें एकीभावसे स्थित रहनेका नाम 'ज्ञानयोग' है, इसीको 'संन्यास' 'सांख्ययोग' इत्यादि नामोंसे कहा है।

‡ फल और आसक्तिको त्यागकर भगवत्-आज्ञानुसार केवल भगवत्-अर्थ समत्वबुद्धिसे कर्म करनेका नाम 'निष्काम कर्मयोग' है, इसीको 'समत्वयोग' 'बुद्धियोग' 'कर्मयोग' 'तदर्थकर्म' 'मदर्थकर्म' 'मत्कर्म' इत्यादि नामोंसे कहा है।

परन्तु किसी भी मार्गके अनुसार कर्मोंको स्वरूपसे त्यागनेकी आवश्यकता नहीं है क्योंकि—

पुरुषः	=मनुष्य	न	=न
न	=न (तो)	संन्यसनात् एव	=कर्मोंको त्यागनेमात्रसे
कर्मणाम्	=कर्मोंके	सिद्धिम्	=भगवत्-साक्षात्कार-रूप सिद्धिको
अनारम्भात्	=न करनेसे		
नैष्कर्म्यम्	=निष्कर्मताको*		
अश्नुते	=प्राप्त होता है	समधिगच्छति	=प्राप्त होता है
च	=और		

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥ ५ ॥

बिना कर्म किये क्षणमात्र भी किसीसे नहीं रहा जाने का कथन ।

न, हि, कश्चित्, क्षणम्, अपि, जातु, तिष्ठति, अकर्मकृत्, कार्यते, हि, अवशः, कर्म, सर्वः, प्रकृतिजैः, गुणैः ॥ ५ ॥

तथा सर्वथा कर्मोंका स्वरूपसे त्याग हो भी नहीं सकता—

हि	=क्योंकि	न	=नहीं
कश्चित्	=कोई भी (पुरुष)	तिष्ठति	=रहता है
जातु	=किसी कालमें	हि	=निःसन्देह
क्षणम्	=क्षणमात्र	सर्वः	=सब (ही पुरुष)
अपि	=भी	प्रकृतिजैः	=प्रकृतिसे उत्पन्न हुए
अकर्मकृत्	=बिना कर्म किये		

* जिस अवस्थाको प्राप्त हुए पुरुषके कर्म, अकर्म हो जाते हैं अर्थात् फल उत्पन्न नहीं कर सकते, उस अवस्थाका नाम 'निष्कर्मता' है।

गुणैः	=गुणोंद्वारा	कर्म	=कर्म
अवशः	=परवश हुए	कार्यते	=करते हैं

मिथ्याचारी पुरुषका लक्षण।

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥

कर्मेन्द्रियाणि, संयम्य, यः, आस्ते, मनसा, स्मरन्, इन्द्रियार्थान्, विमूढात्मा, मिथ्याचारः, सः, उच्यते ॥ ६ ॥

इसलिये—

यः	=जो	मनसा	=मनसे
विमूढात्मा	=मूढ़बुद्धि पुरुष	स्मरन्	=चिन्तन करता
कर्मेन्द्रियाणि	=कर्मेन्द्रियोंको (हठसे)	आस्ते	=रहता है
संयम्य	=रोककर	सः	=वह
इन्द्रियार्थान्	=इन्द्रियोंके भोगोंको	मिथ्याचारः	=मिथ्याचारी अर्थात् दम्भी
		उच्यते	=कहा जाता है

निष्काम कर्मयोगीकी प्रशंसा।

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥

यः, तु, इन्द्रियाणि, मनसा, नियम्य, आरभते, अर्जुन, कर्मेन्द्रियैः, कर्मयोगम्, असक्तः, सः, विशिष्यते ॥ ७ ॥

तु	=और	मनसा	=मनसे
अर्जुन	=हे अर्जुन	इन्द्रियाणि	=इन्द्रियोंको
यः	=जो (पुरुष)	नियम्य	=वशमें करके

असक्तः	= अनासक्त हुआ	आचरते	= आचरण करता है
कर्मेन्द्रियैः	= कर्मेन्द्रियोंसे	सः	= वह
कर्मयोगम्	= कर्मयोगका	विशिष्यते	= श्रेष्ठ है

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ॥

शास्त्रनियत कर्म करनेके लिये आज्ञा।

नियतम्, कुरु, कर्म, त्वम्, कर्म, ज्यायः, हि, अकर्मणः,
शरीरयात्रा, अपि, च, ते, न, प्रसिद्ध्येत्, अकर्मणः ॥ ८ ॥

इसलिये—

त्वम्	= तू	कर्म	= कर्म करना
नियतम्	= शास्त्रविधिसे नियत किये हुए	ज्यायः	= श्रेष्ठ है
		च	= तथा
कर्म	= स्वधर्मरूप कर्मको	अकर्मणः	= कर्म न करनेसे
		ते	= तेरा
कुरु	= कर	शरीरयात्रा	= शरीरनिर्वाह
हि	= क्योंकि	अपि	= भी
अकर्मणः	= कर्म न करनेकी अपेक्षा	न	= नहीं
		प्रसिद्ध्येत्	= सिद्ध होगा

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥ ९ ॥

भगवदर्थ कर्म करनेके लिये आज्ञा।

यज्ञार्थात्, कर्मणः, अन्यत्र, लोकः, अयम्, कर्मबन्धनः,
तदर्थम्, कर्म, कौन्तेय, मुक्तसङ्गः, समाचर ॥ ९ ॥

और हे अर्जुन! बन्धनके भयसे भी कर्मोंका त्याग करना योग्य नहीं है क्योंकि—

यज्ञार्थात्	= यज्ञ अर्थात् विष्णुके निमित्त किये हुए		(इसलिये)
कर्मणः	= कर्मके सिवाय	कौन्तेय	= हे अर्जुन
अन्यत्र	= अन्य कर्ममें (लगा हुआ ही)	मुक्तसङ्गः	= आसक्तिसे रहित हुआ
अयम्	= यह	तदर्थम्	= उस परमेश्वरके निमित्त
लोकः	= मनुष्य	कर्म	= कर्मका
कर्मबन्धनः	= कर्मोंद्वारा बंधता है	समाचर	= भली प्रकार आचरण कर

प्रजापतिकी आज्ञानुसार कर्म करनेसे परम श्रेयकी प्राप्ति।

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥१०॥

सहयज्ञाः, प्रजाः, सृष्ट्वा, पुरा, उवाच, प्रजापतिः,
अनेन, प्रसविष्यध्वम्, एषः, वः, अस्तु, इष्टकामधुक् ॥१०॥

तथा कर्म न करनेसे तू पापको भी प्राप्त होगा क्योंकि—

प्रजापतिः	= प्रजापति (ब्रह्मा) ने	प्रसविष्यध्वम्	= वृद्धिको प्राप्त (होवो और)
पुरा	= कल्पके आदिमें		
सहयज्ञाः	= यज्ञसहित	एषः	= यह यज्ञ
प्रजाः	= प्रजाको	वः	= तुमलोगोंको
सृष्ट्वा	= रचकर		
उवाच	= कहा कि	इष्टकामधुक्	= इच्छित कामनाओंके देनेवाला
अनेन	= इस यज्ञद्वारा (तुमलोग)	अस्तु	= होवे

देवान्भावयतानेन ते देवा भावयन्तु वः । [„]
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥११॥

देवान्, भावयत, अनेन, ते, देवाः, भावयन्तु, वः, परस्परम्, भावयन्तः, श्रेयः, परम्, अवाप्स्यथ ॥११॥

तथा तुमलोग—

अनेन	=इस यज्ञद्वारा	**(एवम्)**	=इस प्रकार
देवान्	=देवताओंकी	**परस्परम्**	=आपसमें (कर्तव्य समझकर)
भावयत	=उन्नति करो (और)	**भावयन्तः**	=उन्नति करते हुए
ते	=वे	**परम्**	=परम
देवाः	=देवतालोग	**श्रेयः**	=कल्याणको
वः	=तुमलोगोंकी	**अवाप्स्यथ**	=प्राप्त होवोगे
भावयन्तु	=उन्नति करें		

इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥

देवताओंको बिना दिये भोग भोगनेवालों की निन्दा ।

इष्टान्, भोगान्, हि, वः, देवाः, दास्यन्ते, यज्ञभाविताः, तैः, दत्तान्, अप्रदाय, एभ्यः, यः, भुङ्क्ते, स्तेनः, एव, सः ॥१२॥

तथा—

यज्ञभाविताः	={यज्ञद्वारा बढ़ाये हुए	**इष्टान्**	=प्रिय
		भोगान्	=भोगोंको
देवाः	=देवतालोग	**दास्यन्ते**	=देंगे
वः	=तुम्हारे लिये (बिना मांगे ही)	**तैः**	=उनके द्वारा
		दत्तान्	=दिये हुए भोगोंको

यः	=जो पुरुष	भुङ्क्ते	=भोगता है
एभ्यः	=इनके लिये	सः	=वह
अप्रदाय	=बिना दिये	एव	=निश्चय
हि	=ही	स्तेनः	=चोर है

यज्ञसे बचा हुआ अन्न खानेवालोंकी प्रशंसा और इसके विपरीत करनेवालोंकी निन्दा।

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥

यज्ञशिष्टाशिनः, सन्तः, मुच्यन्ते, सर्वकिल्बिषैः, भुञ्जते, ते, तु, अघम्, पापाः, ये, पचन्ति, आत्मकारणात् ॥ १३ ॥

कारण कि—

यज्ञशिष्टाशिनः	=यज्ञसे शेष बचे हुए अन्नको खानेवाले	पापाः	=पापीलोग
सन्तः	=श्रेष्ठ पुरुष	आत्मकारणात्	=अपने (शरीर-पोषणके) लिये ही
सर्वकिल्बिषैः	=सब पापोंसे	पचन्ति	=पकाते हैं
मुच्यन्ते	=छूटते हैं (और)	ते	=वे
ये	=जो	तु	=तो
		अघम्	=पापको ही
		भुञ्जते	=खाते हैं

सृष्टिचक्रका वर्णन।

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥ १४ ॥

अन्नात्, भवन्ति, भूतानि, पर्जन्यात्, अन्नसम्भवः, यज्ञात्, भवति, पर्जन्यः, यज्ञः, कर्मसमुद्भवः ॥ १४ ॥

क्योंकि—

भूतानि	= संपूर्ण प्राणी	पर्जन्यः	= वृष्टि
अन्नात्	= अन्नसे	यज्ञात्	= यज्ञसे
भवन्ति	= उत्पन्न होते हैं (और)	भवति	= होती है (और वह)
अन्नसम्भवः	= अन्नकी उत्पत्ति	यज्ञः	= यज्ञ
पर्जन्यात्	= वृष्टिसे होती है (और)	कर्मसमुद्भवः	= कर्मोंसे उत्पन्न होनेवाला है

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् । [„]
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥१५॥

कर्म, ब्रह्मोद्भवम्, विद्धि, ब्रह्म, अक्षरसमुद्भवम्,
तस्मात्, सर्वगतम्, ब्रह्म, नित्यम्, यज्ञे, प्रतिष्ठितम् ॥१५॥

तथा उस—

कर्म	= कर्मको (तू)	तस्मात्	= इससे
ब्रह्मोद्भवम्	= वेदसे उत्पन्न हुआ	सर्वगतम्	= सर्वव्यापी
विद्धि	= जान (और)	ब्रह्म	= परम अक्षर परमात्मा
ब्रह्म	= वेद	नित्यम्	= सदा ही
अक्षर-समुद्भवम्	= अविनाशी (परमात्मा) से उत्पन्न हुआ है	यज्ञे	= यज्ञमें
		प्रतिष्ठितम्	= प्रतिष्ठित है

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः । सृष्टिचक्रके
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥१६॥ अनुसार न बर्तने वालेकी निन्दा ।

एवम्, प्रवर्तितम्, चक्रम्, न, अनुवर्तयति, इह, यः,
अघायुः, इन्द्रियारामः, मोघम्, पार्थ, सः, जीवति ॥१६॥

पार्थ = हे पार्थ
यः = जो पुरुष
इह = इस लोकमें
एवम् = इस प्रकार
प्रवर्तितम् = चलाये हुए
चक्रम् = सृष्टिचक्रके
न अनुवर्तयति = अनुसार नहीं वर्तता है (अर्थात् शास्त्र-अनुसार कर्मोंको नहीं करता है)
सः = वह
इन्द्रियारामः = इन्द्रियोंके सुखको भोगनेवाला
अघायुः = पाप-आयु (पुरुष)
मोघम् = व्यर्थ ही
जीवति = जीता है

आत्मज्ञानीके लिये कर्तव्यका अभाव ।

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥१७॥

यः, तु, आत्मरतिः, एव, स्यात्, आत्मतृप्तः, च, मानवः,
आत्मनि, एव, च, संतुष्टः, तस्य, कार्यम्, न, विद्यते ॥१७॥

तु = परन्तु
यः = जो
मानवः = मनुष्य
आत्मरतिः एव = आत्माहीमें प्रीतिवाला
च = और
आत्मतृप्तः = आत्माहीमें तृप्त
च = तथा
आत्मनि = आत्मामें
एव = ही
संतुष्टः = संतुष्ट
स्यात् = होवे
तस्य = उसके लिये
कार्यम् = कोई कर्तव्य
न = नहीं
विद्यते = है

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥१८॥

कर्म करने और न करनेमें ज्ञानी-की निःस्वार्थता-का कथन ।

न, एव, तस्य, कृतेन, अर्थः, न, अकृतेन, इह, कश्चन,
न, च, अस्य, सर्वभूतेषु, कश्चित्, अर्थव्यपाश्रयः ॥१८॥

क्योंकि–

इह	= इस संसारमें		(प्रयोजन)
तस्य	= उस (पुरुष) का	न	= नहीं है
कृतेन	= किये जानेसे	च	= तथा
एव	= भी (कोई)	अस्य	= इसका
अर्थः	= प्रयोजन	सर्वभूतेषु	= संपूर्ण भूतोंमें
न	= नहीं है (और)	कश्चित्	= कुछ भी
अकृतेन	= न किये जानेसे (भी)	अर्थ-व्यपाश्रयः	= { स्वार्थका संबन्ध
कश्चन	= कोई	न	= नहीं है

तो भी उसके द्वारा केवल लोकहितार्थ कर्म किये जाते हैं ।

तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥१९॥

अनासक्तभावसे कर्तव्यकर्म करने के लिये आज्ञा और उससे भगवत्-प्राप्ति ।

तस्मात्, असक्तः, सततम्, कार्यम्, कर्म, समाचर,
असक्तः, हि, आचरन्, कर्म, परम्, आप्नोति, पूरुषः ॥१९॥

तस्मात्	= इससे (तूं)	कर्म	= कर्मका
असक्तः	= अनासक्त हुआ	समाचर	= { अच्छी प्रकार आचरण कर
सततम्	= निरन्तर		
कार्यम्	= कर्तव्य	हि	= क्योंकि

असक्तः	=अनासक्त	आचरन्	=करता हुआ
पूरुषः	=पुरुष	परम्	=परमात्माको
कर्म	=कर्म	आप्नोति	=प्राप्त होता है

जनकादिके दृष्टान्तसे कर्म करनेके लिये प्रेरणा।

कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि ॥२०॥

कर्मणा, एव, हि, संसिद्धिम्, आस्थिताः, जनकादयः,
लोकसंग्रहम्, एव, अपि, संपश्यन्, कर्तुम्, अर्हसि ॥२०॥

इस प्रकार—

जनकादयः	=जनकादि ज्ञानीजन भी (आसक्तिरहित)	हि	=इसलिये (तथा)
		लोकसंग्रहम्	=लोकसंग्रहको
		संपश्यन्	=देखता हुआ
कर्मणा	=कर्मद्वारा	अपि	=भी (तू)
एव	=ही	कर्तुम्	=कर्म करनेको
संसिद्धिम्	=परमसिद्धिको	एव	=ही
आस्थिताः	=प्राप्त हुए हैं	अर्हसि	=योग्य है

श्रेष्ठ पुरुषके आचरण प्रमाण-स्वरूप माने जानेका कथन।

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥२१॥

यत्, यत्, आचरति, श्रेष्ठः, तत्, तत्, एव, इतरः, जनः,
सः, यत्, प्रमाणम्, कुरुते, लोकः, तत्, अनुवर्तते ॥२१॥

क्योंकि—

श्रेष्ठः	=श्रेष्ठ पुरुष	आचरति	=आचरण करता है
यत्	=जो	इतरः	=अन्य
यत्	=जो	जनः	=पुरुष

तत्	=उस	प्रमाणम्	=प्रमाण
तत्	=उसके	कुरुते	=कर देता है
एव	=ही (अनुसार बर्तते हैं)	लोकः	=लोग (भी)
सः	=वह	तत्	=उसके
यत्	=जो कुछ	अनुवर्तते	=अनुसार बर्तते हैं*

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥२२॥

भगवान्‌के लिये कोई कर्तव्य न होनेपर भी लोक-संग्रहार्थं कर्म करनेकी आवश्यकता का निरूपण।

न, मे, पार्थ, अस्ति, कर्तव्यम्, त्रिषु, लोकेषु, किंचन,
न, अनवाप्तम्, अवाप्तव्यम्, वर्ते, एव, च, कर्मणि ॥२२॥

इसलिये—

पार्थ	=हे अर्जुन (यद्यपि)		(किंचित् भी)
मे	=मुझे	अवाप्तव्यम्	=प्राप्त होने योग्य वस्तु
त्रिषु	=तीनों		
लोकेषु	=लोकोंमें	अनवाप्तम्	=अप्राप्त
किंचन	=कुछ भी	न	=नहीं है (तो भी मैं)
कर्तव्यम्	=कर्तव्य		
न	=नहीं	कर्मणि	=कर्ममें
अस्ति	=है	एव	=ही
च	=तथा	वर्ते	=बर्तता हूं

* यहाँ क्रियामें एकवचन है, परन्तु लोक शब्द समुदायवाचक होनेसे भाषामें बहुवचनकी क्रिया लिखी गयी है।

[„] **यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।**
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥

यदि, हि, अहम्, न, वर्तेयम्, जातु, कर्मणि, अतन्द्रितः, मम, वर्त्म, अनुवर्तन्ते, मनुष्याः, पार्थ, सर्वशः ॥२३॥

हि	=क्योंकि	**पार्थ**	=हे अर्जुन
यदि	=यदि	**सर्वशः**	=सब प्रकारसे
अहम्	=मैं	**मनुष्याः**	=मनुष्य
अतन्द्रितः	=सावधान हुआ	**मम**	=मेरे
जातु	=कदाचित्	**वर्त्म**	=बर्तावके
कर्मणि	=कर्ममें	**अनुवर्तन्ते**	=अनुसार बर्तते हैं अर्थात् बर्तने लग जायं
न	=न		
वर्तेयम्	=बर्तूं (तो)		

[„] **उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ।**
संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥

उत्सीदेयुः, इमे, लोकाः, न, कुर्याम्, कर्म, चेत्, अहम्, संकरस्य, च, कर्ता, स्याम्, उपहन्याम्, इमाः, प्रजाः ॥२४॥

तथा–

चेत्	=यदि	**इमे**	=यह सब
अहम्	=मैं	**लोकाः**	=लोक
कर्म	=कर्म	**उत्सीदेयुः**	=भ्रष्ट हो जायं
न	=न	**च**	=और (मैं)
कुर्याम्	=करूं (तो)	**संकरस्य**	=वर्णसंकरका

कर्ता =करनेवाला
स्याम् =होऊं (तथा)
इमाः =इस सारी
प्रजाः =प्रजाको
उपहन्याम् =हनन करूं अर्थात् मारनेवाला बनूं

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् ॥२५॥

लोकसंग्रहार्थं अनासक्तभावसे कर्म करनेके लिये प्रेरणा ।

सक्ताः, कर्मणि, अविद्वांसः, यथा, कुर्वन्ति, भारत, कुर्यात्, विद्वान्, तथा, असक्तः, चिकीर्षुः, लोकसंग्रहम् ॥२५॥

इसलिये–

भारत =हे भारत
कर्मणि =कर्ममें
सक्ताः =आसक्त हुए
अविद्वांसः =अज्ञानीजन
यथा =जैसे
कुर्वन्ति =कर्म करते हैं
तथा =वैसे ही
असक्तः =अनासक्त हुआ
विद्वान् =विद्वान् (भी)
लोकसंग्रहम् =लोकशिक्षाको
चिकीर्षुः =चाहता हुआ
कुर्यात् =कर्म करे

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥

सकामी पुरुषोंकी बुद्धिमें भ्रम उत्पन्न करनेका निषेध ।

न, बुद्धिभेदम्, जनयेत्, अज्ञानाम्, कर्मसङ्गिनाम्, जोषयेत्, सर्वकर्माणि, विद्वान्, युक्तः, समाचरन् ॥२६॥

तथा–

विद्वान् =ज्ञानी पुरुष (को चाहिये कि)
कर्मसङ्गिनाम् =कर्मोंमें आसक्तिवाले
अज्ञानाम् =अज्ञानियोंकी
बुद्धिभेदम् =बुद्धिमें भ्रम अर्थात् कर्मोंमें अश्रद्धा

न जनयेत्	= उत्पन्न न करे (किन्तु स्वयम्)	समाचरन्	= अच्छी प्रकार करता हुआ
युक्तः	= परमात्माके स्वरूपमें स्थित हुआ (और)		(उनसे भी वैसे ही)
सर्वकर्माणि	= सब कर्मोंको	जोषयेत्	= करावे

मूढ़ पुरुषका लक्षण ।

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहंकारविमूढात्मा कर्ताहमिति मन्यते ॥२७॥

प्रकृतेः, क्रियमाणानि, गुणैः, कर्माणि, सर्वशः, अहंकारविमूढात्मा, कर्ता, अहम्, इति, मन्यते ॥२७॥

और हे अर्जुन ! वास्तवमें—

सर्वशः	= संपूर्ण	अहंकार-विमूढात्मा	= अहंकारसे मोहित हुए अन्तःकरण-वाला पुरुष
कर्माणि	= कर्म		
प्रकृतेः	= प्रकृतिके		
गुणैः	= गुणोंद्वारा	अहम्	= मैं
क्रियमाणानि	= किये हुए हैं	कर्ता	= कर्ता हूं
		इति	= ऐसे
	(तो भी)	मन्यते	= मान लेता है

तत्त्ववेत्ता पुरुष-का लक्षण ।

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥२८॥

तत्त्ववित्, तु, महाबाहो, गुणकर्मविभागयोः, गुणाः, गुणेषु, वर्तन्ते, इति, मत्वा, न, सज्जते ॥२८॥

तु	= परन्तु	महाबाहो	= हे महाबाहो

गुणकर्म-विभागयोः	= गुणविभाग और कर्म-विभागके*	गुणेषु	= गुणोंमें
		वर्तन्ते	= बर्तते हैं
		इति	= ऐसे
तत्त्ववित्	= तत्त्वको † जाननेवाला (ज्ञानी पुरुष)	मत्वा	= मानकर
		न	= नहीं
गुणाः	= संपूर्ण गुण	सज्जते	= आसक्त होता है

प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्मसु ।
तानकृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेत् ॥

अज्ञानियोंको कर्मोंसे चलायमान करनेका निषेध ।

प्रकृतेः, गुणसंमूढाः, सज्जन्ते, गुणकर्मसु, तान्, अकृत्स्नविदः, मन्दान्, कृत्स्नवित्, न, विचालयेत् ॥२९॥

और–

प्रकृतेः	= प्रकृतिके	मन्दान्	= मूर्खोंको
गुण-संमूढाः	= गुणोंसे मोहित हुए पुरुष	कृत्स्नवित्	= अच्छी प्रकार जाननेवाला (ज्ञानी पुरुष)
गुणकर्मसु	= गुण और कर्मोंमें		
सज्जन्ते	= आसक्त होते हैं		
तान्	= उन		
अकृत्स्न-विदः	= अच्छी प्रकार न समझनेवाले	न विचालयेत्	= चलायमान न करे

* त्रिगुणात्मक मायाके कार्यरूप पांच महाभूत और मन, बुद्धि, अहंकार तथा पांच ज्ञानेन्द्रियां, पांच कर्मेन्द्रियां और शब्दादि पांच विषय इन सबके समुदायका नाम 'गुणविभाग' है और इनकी परस्परकी चेष्टाओंका नाम 'कर्मविभाग' है ।

† उपरोक्त 'गुणविभाग' और 'कर्मविभाग' से आत्माको पृथक् अर्थात् निर्लेप जानना ही इनका तत्त्व जानना है ।

संपूर्ण कर्म भगवान्‌में अर्पण करके युद्ध करनेकी आज्ञा।

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥३०॥

मयि, सर्वाणि, कर्माणि, संन्यस्य, अध्यात्मचेतसा,
निराशीः, निर्ममः, भूत्वा, युध्यस्व, विगतज्वरः ॥३०॥

इसलिये हे अर्जुन ! तूं—

अध्यात्म-चेतसा	= ध्याननिष्ठ चित्तसे		(और)
सर्वाणि	= संपूर्ण	निर्ममः	= ममतारहित
कर्माणि	= कर्मोंको	भूत्वा	= होकर
मयि	= मुझमें	विगतज्वरः	= सन्तापरहित (हुआ)
संन्यस्य	= समर्पण करके		
निराशीः	= आशारहित	युध्यस्व	= युद्ध कर

भगवत्‌सिद्धान्तके अनुकूल बर्तनेसे मुक्ति।

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः।३१।

ये, मे, मतम्, इदम्, नित्यम्, अनुतिष्ठन्ति, मानवाः,
श्रद्धावन्तः, अनसूयन्तः, मुच्यन्ते, ते, अपि, कर्मभिः ॥३१॥

और हे अर्जुन—

ये	= जो कोई	नित्यम्	= सदा (ही)
अपि	= भी	मे	= मेरे
मानवाः	= मनुष्य	इदम्	= इस
अनसूयन्तः	= दोषबुद्धिसे रहित	मतम्	= मतके
	(और)	अनुतिष्ठन्ति	= अनुसार बर्तते हैं
श्रद्धावन्तः	= श्रद्धासे युक्त हुए	ते	= वे पुरुष

कर्मभिः	= संपूर्ण कर्मोंसे	मुच्यन्ते	= छूट जाते हैं

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम्।
सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ॥३२॥

भगवत्सिद्धान्त के अनुकूल न बर्तनेसे अधोगति।

ये, तु, एतत्, अभ्यसूयन्तः, न, अनुतिष्ठन्ति, मे, मतम्, सर्वज्ञानविमूढान्, तान्, विद्धि, नष्टान्, अचेतसः ॥३२॥

तु	= और	तान्	= उन
ये	= जो	सर्वज्ञान-विमूढान्	= संपूर्ण ज्ञानोंमें मोहित चित्तवालोंको
अभ्यसूयन्तः	= दोषदृष्टिवाले		
अचेतसः	= मूर्खलोग		
एतत्	= इस		(तूं)
मे	= मेरे		
मतम्	= मतके	नष्टान्	= कल्याणसे भ्रष्ट हुए (ही)
न अनुतिष्ठन्ति	= अनुसार नहीं बर्तते हैं	विद्धि	= जान

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ।३३।

स्वाभाविक कर्म की चेष्टामें प्रकृति की प्रबलता।

सदृशम्, चेष्टते, स्वस्याः, प्रकृतेः, ज्ञानवान्, अपि, प्रकृतिम्, यान्ति, भूतानि, निग्रहः, किम्, करिष्यति ॥३३॥

क्योंकि—

भूतानि	= सभी प्राणी		अर्थात् अपने स्वभावसे
प्रकृतिम्	= प्रकृतिको		परवश हुए कर्म करते हैं
यान्ति	= प्राप्त होते हैं	ज्ञानवान्	= ज्ञानवान्

अपि	=भी		(फिर इसमें किसीका)
स्वस्याः	=अपनी	निग्रहः	=हठ
प्रकृतेः	=प्रकृतिके	किम्	=क्या
सदृशम्	=अनुसार		
चेष्टते	=चेष्टा करता है	करिष्यति	=करेगा

रागद्वेषके वशमें होनेका निषेध।

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥३४॥

इन्द्रियस्य, इन्द्रियस्य, अर्थे, रागद्वेषौ, व्यवस्थितौ,
तयोः, न, वशम्, आगच्छेत्, तौ, हि, अस्य, परिपन्थिनौ ॥३४॥

इसलिये मनुष्यको चाहिये कि—

इन्द्रियस्य	=इन्द्रिय	वशम्	=वशमें
इन्द्रियस्य	=इन्द्रियके	न	=नहीं
अर्थे	=अर्थमें अर्थात् सभी इन्द्रियोंके भोगोंमें	आगच्छेत्	=होवे
		हि	=क्योंकि
		अस्य	=इसके
		तौ	=वे दोनों (ही)
व्यवस्थितौ	=स्थित (जो)	परिपन्थिनौ	=कल्याण-मार्गमें विघ्न करनेवाले महान् शत्रु हैं
रागद्वेषौ	=राग और द्वेष हैं		
तयोः	=उन दोनोंके		

स्वधर्म पालनसे कल्याण और परधर्मसे हानि।

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥३५॥

श्रेयान्, स्वधर्मः, विगुणः, परधर्मात्, स्वनुष्ठितात्,
स्वधर्मे, निधनम्, श्रेयः, परधर्मः, भयावहः ॥३५॥

इसलिये उन दोनोंको जीतकर सावधान हुआ स्वधर्मका आचरण करे क्योंकि—

स्वनुष्ठितात् = अच्छी प्रकार आचरण किये हुए	श्रेयान् = अति उत्तम है
परधर्मात् = दूसरेके धर्मसे	स्वधर्मे = अपने धर्ममें
विगुणः = गुणरहित	निधनम् = मरना (भी)
(अपि) = भी	श्रेयः = कल्याणकारक है (और)
स्वधर्मः = अपना धर्म	परधर्मः = दूसरेका धर्म
	भयावहः = भयको देनेवाला है

अर्जुन उवाच

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥

बलात्कारसे पाप करानेमें कौन हेतु है इस विषयमें अर्जुनका प्रश्न ।

अथ, केन, प्रयुक्तः, अयम्, पापम्, चरति, पूरुषः, अनिच्छन्, अपि, वार्ष्णेय, बलात्, इव, नियोजितः ॥३६॥

इसपर अर्जुनने पूछा कि—

वार्ष्णेय = हे कृष्ण	अनिच्छन् = न चाहता हुआ
अथ = फिर	अपि = भी
अयम् = यह	केन = किससे
पूरुषः = पुरुष	प्रयुक्तः = प्रेरा हुआ
बलात् = बलात्कारसे	पापम् = पापका
नियोजितः = लगाये हुएके	चरति = आचरण करता है
इव = सदृश	

श्रीभगवानुवाच

बलात्कारसे पाप कराने में कामरूप हेतुका कथन।

काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्॥३७॥

कामः, एषः, क्रोधः, एषः, रजोगुणसमुद्भवः, महाशनः, महापाप्मा, विद्धि, एनम्, इह, वैरिणम् ॥३७॥

इस प्रकार अर्जुनके पूछनेपर श्रीकृष्ण महाराज बोले हे अर्जुन—

रजोगुण-समुद्भवः = { रजोगुणसे उत्पन्न हुआ
एषः = यह
कामः = काम (ही)
क्रोधः = क्रोध है
एषः = यह (ही)
महाशनः = { महा अशन अर्थात् अग्निके सदृश भोगोंसे न तृप्त होनेवाला
(और)
महापाप्मा = बड़ा पापी है
इह = इस विषयमें
एनम् = इसको (ही)
(तूं)
वैरिणम् = वैरी
विद्धि = जान

कामरूप वैरीसे ज्ञान ढका हुआ है इस विषयका दृष्टान्तों सहित कथन।

धूमेनाव्रियते वह्निर्यथादर्शो मलेन च।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम्॥ ३८ ॥

धूमेन, आव्रियते, वह्निः, यथा, आदर्शः, मलेन, च, यथा, उल्बेन, आवृतः, गर्भः, तथा, तेन, इदम्, आवृतम् ॥३८॥

यथा = जैसे
धूमेन = धूएंसे
वह्निः = अग्नि
च = और
मलेन = मलसे
आदर्शः = दर्पण
आव्रियते = ढका जाता है
(तथा)

यथा	=जैसे	तथा	=वैसे ही
उल्बेन	=जेरसे	तेन	=उस कामके द्वारा
गर्भः	=गर्भ	इदम्	=यह (ज्ञान)
आवृतः	=ढका हुआ है	आवृतम्	=ढका हुआ है

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा । ["]
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥३९॥

आवृतम्, ज्ञानम्, एतेन, ज्ञानिनः, नित्यवैरिणा,
कामरूपेण, कौन्तेय, दुष्पूरेण, अनलेन, च ॥३९॥

च	=और	कामरूपेण	=कामरूप
कौन्तेय	=हे अर्जुन	ज्ञानिनः	=ज्ञानियोंके
एतेन	=इस	नित्यवैरिणा	=नित्य वैरीसे
अनलेन	=अग्नि (सदृश)	ज्ञानम्	=ज्ञान
दुष्पूरेण	=न पूर्ण होनेवाले	आवृतम्	=ढका हुआ है

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते । कामके वास-
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥४०॥ स्थानोंका कथन।

इन्द्रियाणि, मनः, बुद्धिः, अस्य, अधिष्ठानम्, उच्यते,
एतैः, विमोहयति, एषः, ज्ञानम्, आवृत्य, देहिनम् ॥४०॥

तथा–

इन्द्रियाणि	=इन्द्रियां	अधिष्ठानम्	=वासस्थान
मनः	=मन (और)	उच्यते	=कहे जाते हैं (और)
बुद्धिः	=बुद्धि		
अस्य	=इसके	एषः	=यह (काम)

एतैः = इन (मन, बुद्धि और इन्द्रियों) द्वारा ही
ज्ञानम् = ज्ञानको
आवृत्य = आच्छादित करके (इस)
देहिनम् = जीवात्माको
विमोहयति = मोहित करता है

इन्द्रियोंको वशमें करके काम को मारनेकी आज्ञा।

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥४१॥

तस्मात्, त्वम्, इन्द्रियाणि, आदौ, नियम्य, भरतर्षभ, पाप्मानम्, प्रजहि, हि, एनम्, ज्ञानविज्ञाननाशनम् ॥४१॥

तस्मात् = इसलिये
भरतर्षभ = हे अर्जुन
त्वम् = तूं
आदौ = पहिले
इन्द्रियाणि = इन्द्रियोंको
नियम्य = वशमें करके
ज्ञानविज्ञान-नाशनम् = ज्ञान और विज्ञानके नाश करने-वाले
एनम् = इस (काम)
पाप्मानम् = पापीको
हि = निश्चयपूर्वक
प्रजहि = मार

इन्द्रिय, मन और बुद्धिसे भी आत्माकी अति श्रेष्ठताका कथन।

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥४२॥

इन्द्रियाणि, पराणि, आहुः, इन्द्रियेभ्यः, परम्, मनः, मनसः, तु, परा, बुद्धिः, यः, बुद्धेः, परतः, तु, सः ॥४२॥

और यदि तूं समझे कि इन्द्रियोंको रोककर कामरूप बैरीको मारनेकी मेरी शक्ति नहीं है तो तेरी यह भूल है क्योंकि इस शरीरसे तो—

इन्द्रियाणि = इन्द्रियोंको
पराणि = परे (श्रेष्ठ बलवान् और सूक्ष्म)

आहुः	=कहते हैं (और)	परा	=परे
इन्द्रियेभ्यः	=इन्द्रियोंसे	बुद्धिः	=बुद्धि है
परम्	=परे	तु	=और
मनः	=मन है	यः	=जो
तु	=और	बुद्धेः	=बुद्धिसे (भी)
मनसः	=मनसे	परतः	=अत्यन्त परे है
		सः	=वह (आत्मा) है

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥४३॥

बुद्धिसे परे आत्माको जानकर और मनको वशमें करके कामको मारनेकी आज्ञा ।

एवम्, बुद्धेः, परम्, बुद्ध्वा, संस्तभ्य, आत्मानम्, आत्मना, जहि, शत्रुम्, महाबाहो, कामरूपम्, दुरासदम् ॥४३॥

एवम्	=इस प्रकार	आत्मानम्	=मनको
बुद्धेः	=बुद्धिसे	संस्तभ्य	=वशमें करके
परम्	=परे अर्थात् सूक्ष्म तथा सब प्रकार बलवान् और श्रेष्ठ अपने आत्माको	महाबाहो	=हे महाबाहो (अपनी शक्तिको समझकर इस)
		दुरासदम्	=दुर्जय
बुद्ध्वा	=जानकर (और)	कामरूपम्	=कामरूप
		शत्रुम्	=शत्रुको
आत्मना	=बुद्धिके द्वारा	जहि	=मार

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मयोगो नाम तृतीयोऽध्यायः ॥ ३ ॥

ॐ श्रीपरमात्मने नमः

अथ चतुर्थोऽध्यायः

प्रधान विषय—१ से १८ तक सगुण भगवान्‌का प्रभाव और निष्काम कर्मयोगका विषय, (१९—२३) योगी महात्मा पुरुषोंके आचरण और उनकी महिमा, (२४—३२) फलसहित पृथक् पृथक् यज्ञोंका कथन, (३३—४२) ज्ञानकी महिमा।

श्रीभगवानुवाच

योग की परम्परा और बहुत काल-से उसके लोप हो जानेका कथन।

इमं विवस्वते योगं प्रोक्तवानहमव्ययम्।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्॥१॥

इमम्, विवस्वते, योगम्, प्रोक्तवान्, अहम्, अव्ययम्,
विवस्वान्, मनवे, प्राह, मनुः, इक्ष्वाकवे, अब्रवीत्॥१॥

इसके उपरान्त श्रीकृष्ण महाराज बोले हे अर्जुन—

अहम्	= मैंने		(अपने पुत्र)
इमम्	= इस	मनवे	= मनुके प्रति
अव्ययम्	= अविनाशी	प्राह	= कहा (और)
योगम्	= योगको	मनुः	= मनुने
	(कल्पके आदिमें)	इक्ष्वाकवे	= (अपने पुत्र) राजा इक्ष्वाकुके प्रति
विवस्वते	= सूर्यके प्रति		
प्रोक्तवान्	= कहा था (और)		
विवस्वान्	= सूर्यने	अब्रवीत्	= कहा

[,,]

एवं परम्पराप्राप्तमिमं राजर्षयो विदुः।
स कालेनेह महता योगो नष्टः परंतप॥२॥

एवम्, परम्पराप्राप्तम्, इमम्, राजर्षयः, विदुः,
सः, कालेन, इह, महता, योगः, नष्टः, परंतप॥२॥

एवम् =इस प्रकार
परम्पराप्राप्तम् = परम्परासे प्राप्त हुए
इमम् =इस (योग) को
राजर्षयः =राजर्षियोंने
विदुः =जाना
(परन्तु)
परंतप =हे अर्जुन
सः =वह
योगः =योग
महता =बहुत
कालेन =कालसे
इह = इस (पृथिवी) लोकमें
नष्टः = लोप (प्राय:) हो गया था

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥३॥

पुरातन योगकी प्रशंसा ।

सः, एव, अयम्, मया, ते, अद्य, योगः, प्रोक्तः, पुरातनः,
भक्तः, असि, मे, सखा, च, इति, रहस्यम्, हि, एतत्, उत्तमम् ॥३॥

सः =वह
एव =ही
अयम् =यह
पुरातनः =पुरातन
योगः =योग
अद्य =अब
मया =मैंने
ते =तेरे लिये
प्रोक्तः =वर्णन किया है
हि =क्योंकि (तूं)
मे =मेरा
भक्तः =भक्त
च =और
सखा =प्रिय सखा
असि =है
इति =इसलिये (तथा)
एतत् =यह (योग)
उत्तमम् =बहुत उत्तम
(और)
रहस्यम् = रहस्य अर्थात् अति मर्मका विषय है

अर्जुन उवाच

श्रीकृष्ण भगवान् का जन्म आधुनिक मानकर अर्जुनका प्रश्न करना।

अपरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥४॥

अपरम्, भवतः, जन्म, परम्, जन्म, विवस्वतः,
कथम्, एतत्, विजानीयाम्, त्वम्, आदौ, प्रोक्तवान्, इति ॥४॥

इस प्रकार भगवान् श्रीकृष्णचन्द्र महाराजके वचन सुनकर अर्जुनने पूछा हे भगवन्—

भवतः	=आपका	एतत्	=इस योगको (कल्पके)
जन्म	=जन्म (तो)	आदौ	=आदिमें
अपरम्	=आधुनिक अर्थात् अब हुआ है (और)	त्वम्	=आपने
विवस्वतः	=सूर्यका	प्रोक्तवान्	=कहा था
जन्म	=जन्म	इति	=यह (मैं)
परम्	=बहुत पुराना है (इसलिये)	कथम्	=कैसे
		विजानीयाम्	=जानूं

श्रीभगवानुवाच

श्रीभगवान् द्वारा अपने और अर्जुनके बहुत जन्म व्यतीत होनेका कथन।

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥५॥

बहूनि, मे, व्यतीतानि, जन्मानि, तव, च, अर्जुन,
तानि, अहम्, वेद, सर्वाणि, न, त्वम्, वेत्थ, परंतप ॥५॥

इसपर श्रीकृष्ण महाराज बोले—

अर्जुन	=हे अर्जुन	च	=और
मे	=मेरे	तव	=तेरे

बहूनि	=बहुतसे	सर्वाणि	=सबको
जन्मानि	=जन्म	त्वम्	=तूं
व्यतीतानि	=हो चुके हैं (परन्तु)	न	=नहीं
		वेत्थ	=जानता है (और)
परंतप	=हे परंतप	अहम्	=मैं
तानि	=उन	वेद	=जानता हूं

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥६॥

श्रीभगवान्के जन्मकी अलौकिकता।

अजः, अपि, सन्, अव्ययात्मा, भूतानाम्, ईश्वरः, अपि, सन्, प्रकृतिम्, स्वाम्, अधिष्ठाय, संभवामि, आत्ममायया ॥६॥

तथा मेरा जन्म प्राकृत मनुष्योंके सदृश नहीं है—

(मैं)		ईश्वरः	=ईश्वर
अव्ययात्मा	=अविनाशी-स्वरूप	सन्	=होनेपर
		अपि	=भी
अजः	=अजन्मा	स्वाम्	=अपनी
सन्	=होनेपर	प्रकृतिम्	=प्रकृतिको
अपि	=भी (तथा)	अधिष्ठाय	=आधीन करके
भूतानाम्	=सब भूत-प्राणियोंका	आत्ममायया	=योगमायासे
		संभवामि	=प्रकट होता हूं

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥७॥

श्रीभगवान्के अवतार लेनेके समयका कथन।

यदा, यदा, हि, धर्मस्य, ग्लानिः, भवति, भारत, अभ्युत्थानम्, अधर्मस्य, तदा, आत्मानम्, सृजामि, अहम् ॥७॥

भारत	=हे भारत	भवति	=होती है
यदा	=जब	तदा	=तब तब
यदा	=जब	हि	=ही
धर्मस्य	=धर्मकी	अहम्	=मैं
ग्लानिः	=हानि (और)	आत्मानम्	=अपने रूपको
अधर्मस्य	=अधर्मकी	सृजामि	=रचता हूं अर्थात् प्रकट करता हूं
अभ्युत्थानम्	=वृद्धि		

श्रीभगवान्के अवतार लेनेके कारणका कथन

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ ८ ॥

परित्राणाय, साधूनाम्, विनाशाय, च, दुष्कृताम्,
धर्मसंस्थापनार्थाय, संभवामि, युगे, युगे ॥ ८ ॥

क्योंकि—

साधूनाम्	=साधु पुरुषोंका	विनाशाय	=नाश करनेके लिये (तथा)
परित्राणाय	=उद्धार करनेके लिये	धर्मसंस्थापनार्थाय	=धर्म स्थापन करनेके लिये
च	=और	युगे	=युग
		युगे	=युगमें
दुष्कृताम्	=दूषित कर्म करनेवालोंका	संभवामि	=प्रकट होता हूं

श्रीभगवान्के जन्म कर्मोंको दिव्य जाननेका फल ।

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥९॥

जन्म, कर्म, च, मे, दिव्यम्, एवम्, यः, वेत्ति, तत्त्वतः,
त्यक्त्वा, देहम्, पुनः, जन्म, न, एति, माम्, एति, सः, अर्जुन॥९॥

इसलिये—

अर्जुन	= हे अर्जुन		सः	= वह
मे	= मेरा (वह)		देहम्	= शरीरको
जन्म	= जन्म		त्यक्त्वा	= त्यागकर
च	= और		पुनः	= फिर
कर्म	= कर्म		जन्म	= जन्मको
दिव्यम्	= { दिव्य अर्थात् अलौकिक है		न	= नहीं
एवम्	= इस प्रकार		एति	= प्राप्त होता है (किन्तु)
यः	= जो पुरुष		माम्	= मुझे (ही)
तत्त्वतः	= तत्त्वसे*			
वेत्ति	= जानता है		एति	= प्राप्त होता है

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥१०॥

श्रीभगवान्‌को प्राप्त हुए पुरुषों-के लक्षण ।

वीतरागभयक्रोधाः, मन्मयाः, माम्, उपाश्रिताः,
बहवः, ज्ञानतपसा, पूताः, मद्भावम्, आगताः ॥ १० ॥

* सर्वशक्तिमान् सच्चिदानन्दघन परमात्मा अज अविनाशी और सर्व-भूतोंके परम गति तथा परम आश्रय हैं, वे केवल धर्मको स्थापन करने और संसारका उद्धार करनेके लिये ही अपनी योगमायासे सगुणरूप होकर प्रकट होते हैं इसलिये परमेश्वरके समान सुहृद् प्रेमी और पतितपावन दूसरा कोई नहीं है ऐसा समझकर जो पुरुष परमेश्वरका अनन्य प्रेमसे निरन्तर चिन्तन करता हुआ आसक्तिरहित संसारमें वर्तता है वही उनको तत्त्वसे जानता है।

और हे अर्जुन पहिले भी—

वीतराग-भयक्रोधाः	= राग भय और क्रोधसे रहित	उपाश्रिताः	= शरण हुए
		बहवः	= बहुतसे पुरुष
मन्मयाः	= अनन्यभावसे मेरेमें स्थिति-वाले	ज्ञानतपसा	= ज्ञानरूप तपसे
		पूताः	= पवित्र हुए
		मद्भावम्	= मेरे स्वरूपको
माम्	= मेरे	आगताः	= प्राप्त हो चुके हैं

श्रीभगवान्‌को भजने वाले पुरुषोंके अनुकूल भगवान्‌के वर्ताव-का कथन।

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥११॥

ये, यथा, माम्, प्रपद्यन्ते, तान्, तथा, एव, भजामि, अहम्, मम, वर्त्म, अनुवर्तन्ते, मनुष्याः, पार्थ, सर्वशः ॥ ११ ॥

क्योंकि—

पार्थ	= हे अर्जुन	भजामि	= भजता हूं (इस रहस्यको जानकर ही)
ये	= जो		
माम्	= मेरेको		
यथा	= जैसे	मनुष्याः	= बुद्धिमान् मनुष्यगण
प्रपद्यन्ते	= भजते हैं		
अहम्	= मैं (भी)	सर्वशः	= सब प्रकारसे
तान्	= उनको	मम	= मेरे
तथा	= वैसे	वर्त्म	= मार्गके
